© INNOVATIVE RESEARCH THOUGHTS
Refereed | Peer Reviewed | Indexed
ISSN : 2454 – 308X | Volume : 10 , Issue : 01 | January - March 2024

# पाणिनिकृत–अष्टाध्याय्यां जनपदानां वर्णनम्

**डॉ. सुरेन्द्र पाल**

सह–आचार्य, व्याकरण

महर्षि वाल्मीकि संस्कृत विश्वविद्यालय, मून्दड़ी, कैथल

पाणिनिकृत–अष्टाध्याय्यां न केवलं व्याकरण–सम्बन्धित–सूत्राणां वर्णनमस्ति अपितु सूत्रमाध्यमेन तात्कालिक–जनपदानां वर्णनमपि अकरोत्। यैः तात्कालिक–इतिहासस्य ज्ञानमपि भवति। सूत्रकाले जनपदो भारतीयभूगोलस्य अति महत्त्वपूर्णशब्दः आसीत् । वस्तुतः भारतीयेतिहासे युग–विभागदृष्ट्या सूत्रकालस्य उचितं नामकरणं महाजनपदयुगोऽस्ति। तदानीं अखिलदेशः जनपदेषु विभक्तो आसीत्। तेषां विस्तृत–नामावलयः भुवकोशस्य नाम्ना लिपिबद्धाः कृताऽऽसीत्, याः महाभारतादिप्राचीनग्रन्थेषु[1] सुरक्षिताः सन्ति।

पाणिनीय–भूगोलस्य प्रधानाङ्गं जनपदविभागमस्ति । सांस्कृतिक–राजनैतिक–भौगौलिक भाषायाश्च दृष्ट्या प्रत्येकं जनपदस्स्वाभाविक–अन्विति भवतिस्म। यूनानी–पुरराज्यवत् एव प्रायः तदानीम् अस्मिन् देशे जनपदराज्यानां समूहः सम्पूर्णदेशे प्रासरत् । काशिकाकारः ग्रामस्य समूहो जनपदोऽकथयत् ।[2] अत्र ग्रामशब्दे नगरस्यापि अन्तर्भावोऽवगच्छेत् । वस्तुतः जनपदे नगर–ग्रामाश्च सम्मिलिताः आसन् ।[3] जनपदानां राजनैतिक–सीमाः परिवर्तिताः भवन्तिस्म, किन्तु तेषां सांस्कृतिकजीवनस्य प्रवाहः अजस्रम् आसीत् । भाषायाः अन्वितेः रूपे कियन्तः प्राचीनजनपदाः इदानीम् अवशिष्टास्सन्ति, यथा – पैशाची–भाषायाः क्षेत्रं दरद्जनपदः, व्रजोपभाषयाः शूरसेनजनपदः, कोसली–भाषायाः कोसलजनपदः, मगधी–भाषायाः मगधजनपदः इत्यादयः ।

ये जनपदाः विस्तारेण बृहद् आसन् तेषां किञ्चिद्–भागानां पृथक्–पृथक् नामानि आसन्। एतादृशाः किञ्चिद् जनपदानां नामानि व्याकरणसाहित्यस्य उदाहरणेषु अवशिष्टाः सन्ति। यथा पूर्वमद्र–अपरमद्र–पूर्वपंचाल–अपरपंचालाः[4] इत्यादयः। एवं दिक्काचि–शब्दान् योजयित्वा जनपदस्य विभागानां नामकरणार्थं पाणिनिः विशेषनियमोऽकथयत् ।[5] मद्रजनपदः अतिमहत् आसीत् । रावीतः झेलमपर्यन्तं तस्य विस्तारः आसीत् । मध्यस्य चनाबनदी तं भागद्वयं करोतिस्म । स्वभावतः झेलम–चनाबयोः मध्यस्य प्राच्यभागः अपरमद्रः (अद्यत्वे गुजरात जिला) रावी–चनाबयोश्च मध्यस्य भागः पूर्वमद्रः (स्यालकोट) अकथयत्। मद्रजनपदस्य राजधानी शाकलः आसीत्। वस्तुतः मद्रैव वास्तविकरूपेण पञ्जाबप्रदेशः आसीत्। अत्रत्यैव राजा शल्यः अंगदेशस्य च राजा कर्णस्य परस्परं विवादस्य वर्णनं महाभारतस्य कर्णपर्वणि प्राप्यते। पूर्वीमद्रस्य निवासी पौर्वमद्रः प्राचीमद्रस्य च आपरमद्रः कथ्यते स्म। एतानि नामानि कारणं विना

---

1 जनपद सूचियां – भीष्मपर्व – महाभा. – अध्याय–9
मार्कण्डेयपुराण – अध्याय – 57
वायुपुराण – अध्याय–54
वामनपुराण – अध्याय–13
ब्रह्मपुराण – अध्याय–27

2 ग्राम समुदायो जनपदः काशि– 4–2–1

3 उदीच्यग्रामाश्च बह्वचोऽन्तोदात्तात् – 4–2–108

4 दिक् शब्दा ग्रामजनपदाख्यानचानराटेषु – 6–2–103

5 दिक् शब्दा ग्रामजनपदाख्यानचानराटेषु – 6–2–103

प्रयुक्तानि न शक्यन्ते। एतस्मिन् सूत्रे पाञ्चालजनपदस्य विभागानां वर्णनमस्ति।[1] पाञ्चालजनपदस्य त्रयो विभागास्सन्ति स्म। पूर्वपाञ्चालाः, अपरपाञ्चालाः, दक्षिणपाञ्चालाः।

महाभारतानुसारं दक्षिणोत्तरपाञ्चालयोश्च मध्ये गङ्गानद्यास्सीमा आसीत्। एटा–फर्रुखाबादस्य जिलाः दक्षिणपाञ्चालाः आसन्। एतत् ज्ञायते यत् उत्तरपाञ्चालस्यापि पूर्वापरौ भागद्वयम् आसीत्। द्वयोः रामगंगानदी विभागं करोति स्म। एते भागाः एव व्याकरणस्य पूर्वपाञ्चालाः अपरपाञ्चालाः आसन् एवं समस्तजनपदस्य नामानि भाषायां आयान्तिस्म येषां कृते अष्टाध्याय्याः सप्तमोऽध्यायस्य तृतीयपादस्य द्वादशसूत्रे विधानम् अक्रियत।[2] यथा– सर्वपाञ्चालाः, अर्धपञ्चालाः। संस्कृतभाषायाः एष नियमोऽस्ति यत् जनपदवाचिनां सर्वदा बहुवचने भवन्ति, यथा– पञ्चालाः, कुरवाः, मत्स्याः, अंगाः, बंगाः मगधाः, काशयः, अवंतयः, गंधाराः आदयः।

जनपदाः राजनैतिक दृष्ट्या प्रकारद्वयम् अभवत् – एकसघः एकराजश्च। संघशासनजनपदेषु क्षत्रियगणानां राज्यम् आसीत्। ते क्षत्रियजनपदनाम्ना च आहुताः आसन्। एकराजजनपदेषु एकः व्यक्तिः राजा भवति स्म, स्थितिः एतादृशी आसीत् यत् जनपदराज्ञः नाम जनपदस्य प्रतिनागरिकक्षत्रियस्य च पुत्रस्य नाम समानो भवति स्म। यथा पाणिनिकृत–सूत्रे द्रष्टुं शक्यते।[3] पञ्चालक्षत्रियस्य पुत्रः पाञ्चालः कथ्यते स्म तथैव पाञ्चालजनपदराज्ञः पुत्रोऽपि पाञ्चालः कथ्यते स्म। पाणिनिः अष्टाध्याय्याः चतुर्थोऽध्यायस्य प्रथमपादस्य अष्टषष्ट्यधिकैकशतं सूत्रे एतेषां नाम्नां व्युत्पत्तौ विशेषध्यानम् अयच्छत्।[4]

एकस्मिन् जनपदे निवासिनः जनाः परस्परं 'सजनपद' इति नाम्ना कथ्यन्ते स्म। षष्ठोऽध्यायस्य तृतीयपादस्य पञ्चाशीतिस्सूत्रे एतत् वर्णितमस्ति।[5]

महाजनपदयुगस्य 16 जनपदानां नामानि बौद्धसाहित्ये प्राप्नुवन्ति। तेषु नवनामानि पाणिनिरपि अष्टाध्याय्यां दत्तानि सन्ति। यथा– मगध–काशि–कोसल–वृजि–कुरु–अश्मक–अवंति–गंधार–कम्बोजादयः।

राजनैतिकदृष्ट्या पाणिनेः काले निम्नलिखिताः जनपदाः एकराजशासनस्य अधीनाः आसन्। यथा– मगध–कलिंग–सूरमस(असम प्रांत)– कोसल–कुरु–प्रत्यग्रथ(पंचाल)–अश्मक–साल्वेय–गांधारि–साल्व–कंबोज–अवंति–कुन्त्यादयः।

पाणिनेः अष्टाध्याय्यां येषां जनपदानां नामानि प्राप्नुवन्ति तेषां वर्णनम् इत्थमस्ति –

कंबोजजनपदः –

पाणिनेः काले अयम् एकराजजनपदः आसीत्। अत्रत्यैव राजा क्षत्रियकुमारश्च एतौ कंबोजौ कथ्येते स्म। अतः "कम्बोजाल्लुक्" सूत्रेण अपत्यवाचिनः राजावाचिनश्च प्रत्ययानां लोपो भवति। अष्टाध्याय्याः चतुर्थोऽध्यायस्य तृतीयपादस्य त्रिनवतिस्सूत्रे अष्टजनपदानां नामानि प्राप्यन्ते।[6] यथा– सिंधु–वर्णु–गंधार–मधुमत्–कंबोज–कश्मीर–साल्व–कुलुनादयः।

---

1 दिशोऽमद्राणाम् – 7–3–13

2 सुसर्वार्द्धाज्जनपदस्य –7–3–12

3 जनपदसमानशब्दात् क्षत्रियादञ् – 4–1–166

4 द्व्यञ्मगधकलिङ्गसूरमसादण् – 4–1–168

5 समानः जनपद सजनपदः – 6–3–85

6 सिन्धुतक्षशिलादिभ्योऽणञौ – 4–3–93, 4–2–133

© INNOVATIVE RESEARCH THOUGHTS
Refereed | Peer Reviewed | Indexed
ISSN : 2454 – 308X | Volume : 10 , Issue : 01 | January - March 2024

कंबोजप्रदेशस्य उचितं ज्ञानं भारतस्य उत्तर–पश्चिम–भूगोलस्य कृते महत्त्वपूर्णम् अस्ति । आधुनिक–पामीर–बदख्शान्योश्च नाम कंबोजजनपदः आसीत् । यास्कानुसारं गत्यर्थक–शवतिधातुः कंबोजदेशे प्रयुक्तो भवति ।[1]

प्रकण्वजनपदः –

अष्टाध्याय्याः षष्ठोऽध्यायस्य प्रथमपादस्य त्रिपञ्चाशतधिकैकशतं सूत्रे प्रस्कण्वः एकस्य ऋषेर्नाम वर्तते । अस्यैव प्रत्युदाहरणं प्रकण्वोऽस्ति । यत् एकस्य देशस्य नाम आसीत् ।[2] प्रकण्वदेशोऽपि मध्यएशिया–भूगोलस्य अङ्गमासीत् ।

गाधारजनपदः –

पाणिनिः अस्य जनपदस्य अतिप्राचीनं नाम "गांधारि" एकस्मिन् सूत्रे दत्तम् । तत्र राजा तेषाञ्च पुत्राः गांधाराः कथ्यन्ते स्म । पश्चाद् नाम 'गंधारः' गणपाठे प्राप्नोति । गंधार–महाजनपदस्य विस्तारः काश्करनदीतः तक्षशिलापर्यन्तं प्रासरत् । मार्कण्डेयपुराणे 'पुष्कलाः' जनपदस्य नाम प्राप्नोति ।[3] यस्य स्थानं पुष्कलवती भवेत् । सुवास्तु गौरी च नद्योः मध्ये उडियान (प्राचीन उर्दिदेश) आसीत्, यो गाधारस्यैव एकः भागः आसीत् । तेन निर्मितः पाण्डुकंबलस्य वर्णनं पाणिनिः चतुर्थोऽध्यायस्य द्वितीयपादस्य एकादशसूत्रे कृतम् ।[4] ये रथाच्छादनस्य कार्ये प्रयुक्ताः भवन्ति स्म ।

सिन्धुजनपदः –

अस्य स्थानस्य वर्णनं पाणिनिः अष्टाध्याय्याः चतुर्थोऽध्यास्य तृतीयपादस्य द्वात्रिंशत्सूत्रे कृतमस्ति ।[5] सिन्धुनद्यः पूर्वे सिंधसागर–दुआबस्य प्राचीनं नाम सिन्धुरासीत् । सिंधुदेशे उत्पन्नाः जनाः सिन्धुकाः कथ्यन्ते स्म । सिंधुदेशे यस्य पूर्वजाः अवसन् तेषां संज्ञा सैंधवः भवति स्म ।

ब्राह्मणकजनपदः –

अष्टाध्याय्यां ब्राह्मणकः एकस्य देशस्य नाम वर्तते । यथा अनेन सूत्रेण ज्ञायते ।[6] पतञ्जलेः अनुसारं अयं एकः जनपदः आसीत ।[7] अस्य ज्ञानं यूनानी–लेखकानां ब्राखमनोई–अर्रियन–वर्तमान–ब्राह्मणवाद सिंधप्रान्तस्य मध्ये एव कर्तुं शक्यते । अत्र प्राचीनकालस्य विस्तृत–ध्वंसावशेषाः सन्ति । राजशेखरः काव्यमीमांसायां पश्चिमी–जनपदानां सूच्चौ इमं 'ब्राह्मणवह' इति अकथयत् ।

---

1 शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते ।

2 प्रकण्वो देशः – काशिका

3 मार्कण्डेयपुराण – 57/39

4 द्वैपवैयाघ्रादञ् – 4–2–11

5 सिन्ध्वकराभ्यां कन् – 4–3–32

6 ब्राह्मणकोष्णिके संज्ञायाम् – 5–2–71, वा. 30

7 ब्राह्मणको नाम जनपदः – 4–2–104

© INNOVATIVE RESEARCH THOUGHTS
Refereed | Peer Reviewed | Indexed
ISSN : 2454 – 308X | Volume : 10 , Issue : 01 | January - March 2024

कच्छजनपदः –

सिंधोः दक्षिणे कच्छजनपदोऽस्ति । पाणिनिः कच्छी–मनुष्यान् काच्छकोऽकथयत् । तत्रत्यैव च जनानां कासाञ्चित् विशेषतानामपि चतुर्थोऽध्यायस्य द्वितीयपादस्य चतुस्त्रिंशतधिकैकशतं सूत्रे सङ्केतमपि अयच्छत् ।[1] काशिकायाम् अस्य उदाहरणत्रयमस्ति

1. काच्छकं हसितम्
2. काच्छकं जल्पितम्
3. काच्छिका चूड़ा

अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य पंचविंशत्यधिकैकशतं सूत्रे पाणिनिना कच्छांत देशनाचिनां नाम् उल्लेखः कृतोऽस्ति ।[2]

केकयजनपदः – अस्य देशस्य नाम्नः वर्णनं पाणिनिना सप्तमोऽध्यायस्य तृतीयपादस्य द्वितीयसूत्रे कृतमस्ति ।[3]

मद्रजनपदः – मद्रजनपदः प्राचीन–वाहीकस्य उत्तरभागः आसीत् ।[4] अस्य राजधानी शाकलः (स्यालकोट) आसीत् । या अपगानद्याः तटे स्थिताऽस्ति ।

उशीनरजनपदः – पाणिनिः अष्टाध्याय्याः चतुर्थोध्यायस्य द्वितीयपादस्य सप्तदशाधिकैकशतं सूत्रे अस्य नाम्नः वर्णनम् अकरोत् ।[5] काशिकारोऽपि कथितमस्ति यत् उशीनरेषु ये वाहीकग्रामाः । महाभारतेऽपि शिबिं उशीनरस्य राजा अकथयत् ।[6]

अंबष्ठजनपदः – अस्य जनपदस्य वर्णनं पाणिनिकृत–अष्टाध्याय्याः अष्टमोऽध्यायस्य तृतीयपादस्य नवसप्ततिः सूत्रे कृतमस्ति ।[7] अयं जनपदः राजाधीनासीत् अस्य च निवासिनः आंबष्ठ्यः कथ्यन्ते स्म । महाभारतानुसारं अंबष्ठाः कुरुभिः सह मिलित्वा युद्धम् अकुर्वन् । एते अतिवीराः आसन् चनाबनद्याश्च निम्नभागे अवसन् ।

त्रिर्गतजनपदः – पाणिनिः त्रिगर्तदेशस्य आयुधजीवी–संघानाम् उल्लेखम् अकरोत् । रावी–व्यास–सतलुज इत्येतासां नदीनां मध्यप्रदेशः त्रिगर्त कथ्यते स्म । अस्य प्राचीननाम जालंधरायणोऽपि आसीत् । यस्योल्लेखः पाणिनिः अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य द्विपञ्चाशत् सूत्रे अकरोत् ।[8] इदानीमपि त्रिगर्तकांगड़ा–इत्यस्य प्रदेशः जालंधरनाम्ना कथ्यते । पाणिनिः त्रिगर्तस्य षड्संघराज्यानाम् उल्लेखम् अकरोत् । ये आयुधजीविनः आसन् ।

कलकूटजनपदः – सभापर्वानुसारं कालकूटः कुलिन्दप्रदेशे आसीत् । यदा अर्जुन–भीम–कृष्णः एते जरासंधं विजेतुं गुप्तरूपेण गतवन्तः तु यद्यपि एते कुरुजनपदतः पूर्वं प्रति गमनमासीत् तथापि ते प्राक् पश्चिमदिशं प्रति अगच्छन् । ततः उत्तरं प्रति कुरुक्षेत्रे पद्मसरोवरं प्रति अगच्छन् अग्रे च कलकूटजनपदं पारं कृत्वा मिथिलायां प्राप्वन्तः पुनः ततः गंगाम् उत्तीर्य राजगृहे प्राप्तवन्तः । अस्मिन् मार्गे कालकूटः

---

[1] मनुष्यतत्स्थयोर्वुञ् – 4–2–134

[2] कच्छाग्निवक्त्रगर्त्तोत्तरपदात् – 4–2–125

[3] केकयमित्रयुप्रलयानां यादेरियः – 7–3–2

[4] मद्रवृज्योः कन् – 4–2–130

[5] विभाषोशीनरेषु – 4–2–117

[6] महाभारत – वन. – 194–2

[7] अम्बाम्बगोभूमिसव्य ..................... स्थः । 8–3–97

[8] राजन्यादिभ्यो वुञ् । 4-2-52

तमसायमुनयोः प्रदेशोऽस्ति। अयं यमुनायाः ऊर्ध्वधारायाः यामुनप्रदेशः आसीत्। अथर्ववेदे हिमालये उत्पन्नः यामुनः अंजनस्योल्लेखोऽस्ति।[1] अंजनस्य हेतोः यामुनपर्वतस्य नाम कालकूटः या कृष्णपर्वतः भवनं स्वभाविकः आसीत्।

भारद्वाजजनपदः – पाणिनिः अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य चतुश्चत्वारिंशदधिकैकशतं सूत्रे वर्णनम् अकरोत्।[2] अस्मिन् सूत्रे भारद्वाजं देशवाची अमन्यत्, गोत्रवाची न। पाणिनिः भारद्वाजानां शाखा आत्रेय अकथयत्।

कुरुजनपदः – कुरुराष्ट्र–कुरुक्षेत्र–कुरुजांगल एतानि त्रीणि स्थानानि परस्परं अतीव समीपे आसन्। थानेश्वर–हस्तिनापुर–हिसार अथवा सरस्वती–यमुना–गंगा एतासां मध्यप्रदेशः एतेषु त्रिषु भौगोलिक–भागेषु विभक्तम् आसीत्। गंगा–यमुनयोः मध्ये प्रायः मेरठ कमिश्नरी इत्यस्य स्थानं वास्तविकं कुरुराष्ट्रमासीत्। अस्य राजधानी हस्तिनापुरम् आसीत्। पाणिनिः अष्टाध्याय्याः षष्ठोऽध्यायस्य द्वितीयपादस्य एकाधिकैकशतं सूत्रे इदं हास्तिनपुरम् अकथयत्।[3] पाणिनिः विशेषरूपेण 'कुरु गार्हपतम्' रूपस्य सिद्धिः कृतास्ति। अस्य विशेषशब्दस्य अर्थः कुरुजनपदस्य सः धार्मिकः नैतिकश्च दृष्टिकोणम् आसीत्। यस्यानुसारं गृहस्थ–जीवने वसन्तः जनाः सदाचारस्य धर्मस्य च सम्यक् रूपेण अपालयन्। अस्य दार्शनिक–दृष्टिकोणस्य परिचयः कुरुधम्म–जातकस्य शीलधर्मे गीतायाश्च कर्मप्रधान–नीतिधर्मे प्राप्नोति, यः द्वाभ्यां कुरुजनपदाभ्यां सह सम्बन्धितोऽस्ति। जातके इममेव कुरुवत्तधम्मः अकथयत्।

साल्वजनपदः – पाणिनिः अष्टाध्याय्याः चतुर्थोऽध्यायस्य प्रथमपादस्य एकसप्तत्यधिकैकशतं साल्वः इति जनपदस्य वर्णनम् अकरोत्।[4] साल्व–साल्वेय–साल्वावयव इत्यादयः पृथक्–पृथक् जनपदरूपे कथितास्सन्ति , ये राजाधीनासन्। एतेषु साल्वः मूलराज्यम् आसीत्।

कोसलजनपदः – अयं राजाधीन–जनपदः बुद्धकालीन–षोडश–महाजनपदेषु आगणयत्। अस्य वर्णनम् अष्टाध्याय्याः चतुर्थोऽध्यायस्य प्रथमपादस्य नवषष्ट्यधिकैकशतम् इति सूत्रे अभवत्।[5]

मगधजनपदः – गंगायाः दक्षिणस्य प्रदेशः मगधजनपदः आसीत् यत्र राजतन्त्र–शासनम् आसीत्। अस्य वर्णनं पाणिनिः अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य अष्टषष्ट्यधिकैकशतं सूत्रे कृतम् अस्ति।[6]

कलिंगजनपदः – अस्य जनपदस्योल्लेखः पाणिनिना अष्टाध्याय्याः चतुर्थोऽध्यायस्य प्रथमपादस्य अष्टषष्ट्यधिकैकशतं सूत्रे कृतोऽस्ति।[7]

अवन्तिजनपदः – अष्टाध्याय्याः चतुर्थोऽध्यायस्य प्रथमपादस्य चतुस्सप्तत्यधिकैकशतं सूत्रे अस्य वर्णनं प्राप्यते।[8] अयं मध्यभारतस्य प्रसिद्धः जनपदः आसीत्।

कुन्तिजनपदः – अस्य जनपदस्य वर्णनमपि(4–1–174) इत्यस्मिन् सूत्रे कृतमस्ति।

---

[1] अथर्ववेद 4–9–10

[2] कृकणपर्णाद्भारद्वाजे। 4–2–144

[3] न हास्तिनफलकमार्देयाः 6–2–101

[4] साल्वावयवप्रत्यग्रथकलूकटाश्मकादिञ्। – 4–1–171

[5] वृद्धेत्कोसलाजादाञ्ञ्यङ्। – 4–1–169

[6] द्वयञ्मगधकलिङ्गसूरमसादण्। – 4–1–168

[7] द्वयञ्मगधकलिङ्गसूरमसादण्। 4–1–168

[8] स्त्रियामवन्तिकुन्तिकुरुभ्यश्च। 4–1–174

© INNOVATIVE RESEARCH THOUGHTS
Refereed | Peer Reviewed | Indexed
ISSN : 2454 – 308X | Volume : 10 , Issue : 01 | January - March 2024

अश्मकजनपदः – अष्टाध्याय्याः चतुर्थोऽध्यायस्य प्रथमपादस्य एकसप्तत्यधिकैकशतं सूत्रे अस्य वर्णनं कृतमस्ति[1] । अश्मकजनपदस्य राजधानी अन्यग्रन्थानुसारं प्रतिष्ठानम् आसीत् । अनेन गोदावरीनद्याः दक्षिणसह्याद्रि–पर्वतश्रृंखलां यावत् अश्मकजनपदस्य विस्तारः ज्ञायते ।

भौरिकिजनपदः – पाणिनिः अष्टाध्याय्याः चतुर्थोऽध्यायस्य द्वितीयपादस्य त्रिपञ्चाशत् सूत्रे वर्णनम् अकरोत् ।[2] वैजन्तीकोशानुसारं बंगालस्य समतटप्रदेशः भौरिकः कथ्यते स्म । एवं उत्तरदिशि कम्बोजः , दक्षिणे अश्मकः , पश्चिमे सौवीरः पूर्वे सूरमसश्च एतेषां चतुर्णां स्तम्बानां मध्यः भूप्रदेशः पाणिनेः भौगोलिक–परिधेः अन्तर्गतमसीत् ।

एवं पाणिनिः दरद्–गब्दिका–किष्किंधा–पटच्चर–यकृल्लोम–सर्वसेन इत्यादीनां जनापदानां वर्णनं ‘अष्टाध्यायी’ इति ग्रन्थे अकरोत् । अतः सूत्राणाम् अधीत्य न केवलं व्याकरणस्य ज्ञानं भवति अपितु अस्माकम् इतिहासस्य ज्ञानमपि भवितुर्महति ।

---

[1] साल्वावयव प्रत्यग्रंथकलकूटाश्मकादिञ् । 4–1–171

[2] भौरिक्याद्यैषुकार्यादिभ्योविधल्भक्तलौ । 4–2–53